✧˖°*❋ ❋*°˖✧

# नाम रामायण

# Naam Ramayan

✧˖°*❋ ❋*°˖✧

# ॥ नाम रामायण ॥

## ॥ बालकांडः ॥

शुद्धब्रह्मपरात्पर राम ॥
कालात्मकपरमेश्वर राम ॥
शेषतल्पसुखनिद्रित राम ॥
ब्रह्माद्यमरप्रार्थित राम ॥
चंडकिरणकुलमंडन राम ॥
श्रीमद्दशरथनंदन राम ॥
कौसल्यासुखवर्धन राम ॥
विश्वामित्रप्रियधन राम ॥
घोरताटकाघातक राम ॥
मारीचादिनिपातक राम ॥ 10 ॥
कौशिकमखसंरक्षक राम ॥
श्रीमदहल्योद्धारक राम ॥
गौतममुनिसंपूजित राम ॥
सुरमुनिवरगणसंस्तुत राम ॥
नाविकधाविकमृदुपद राम ॥
मिथिलापुरजनमोहक राम ॥
विदेहमानसरंजक राम ॥
त्र्यंबककार्मुखभंजक राम ॥
सीतार्पितवरमालिक राम ॥
कृतवैवाहिककौतुक राम ॥ 20 ॥
भार्गवदर्पविनाशक राम ॥
श्रीमदयोध्यापालक राम ॥

राम राम जय राजा राम ॥
राम राम जय सीता राम ॥

## ॥ अयोध्याकांडः ॥

अगणितगुणगणभूषित राम ॥
अवनीतनयाकामित राम ॥
राकाचंद्रसमानन राम ॥
पितृवाक्याश्रितकानन राम ॥
प्रियगुहविनिवेदितपद राम ॥
तत्क्षालितनिजमृदुपद राम ॥
भरद्वाजमुखानंदक राम ॥
चित्रकूटाद्रिनिकेतन राम ॥ ३० ॥
दशरथसंततचिंतित राम ॥
कैकेयीतनयार्पित राम ॥
विरचितनिजपितृकर्मक राम ॥
भरतार्पितनिजपादुक राम ॥

राम राम जय राजा राम ॥
राम राम जय सीता राम ॥

## ॥ अरण्यकांडः ॥

दंडकावनजनपावन राम ॥
दुष्टविराधविनाशन राम ॥
शरभंगसुतीक्ष्णार्चित राम ॥
अगस्त्यानुग्रहवर्दित राम ॥
गृध्राधिपसंसेवित राम ॥
पंचवटीतटसुस्थित राम ॥ ४० ॥
शूर्पणखार्त्तिविधायक राम ॥
खरदूषणमुखसूदक राम ॥
सीताप्रियहरिणानुग राम ॥

मारीचार्तिकृताशुग राम ॥
विनष्टसीतान्वेषक राम ॥
गृध्राधिपगतिदायक राम ॥
शबरीदत्तफलाशन राम ॥
कबंधबाहुच्छेदन राम ॥

राम राम जय राजा राम ॥
राम राम जय सीता राम ॥

## ॥ किष्किंधाकांडः ॥

हनुमत्सेवितनिजपद राम ॥
नतसुग्रीवाभीष्टद राम ॥ 50 ॥
गर्वितवालिसंहारक राम ॥
वानरदूतप्रेषक राम ॥
हितकरलक्ष्मणसंयुत राम ॥
राम राम जय राजा राम ॥
राम राम जय सीता राम ॥

## ॥ सुंदरकांडः ॥

कपिवरसंततसंस्मृत राम ॥
तद्गतिविघ्नध्वंसक राम ॥
सीताप्राणाधारक राम ॥
दुष्टदशाननदूषित राम ॥
शिष्टहनूमद्भूषित राम ॥
सीतावेदितकाकावन राम ॥
कृतचूडामणिदर्शन राम ॥ 60 ॥
कपिवरवचनाश्वासित राम ॥

राम राम जय राजा राम ॥
राम राम जय सीता राम ॥

**॥ युद्धकांडः ॥**

रावणनिधनप्रस्थित राम ॥
वानरसैन्यसमावृत राम ॥
शोषितशरदीशार्त्तित राम ॥
विभीष्णाभयदायक राम ॥
पर्वतसेतुनिबंधक राम ॥
कुंभकर्णशिरश्छेदक राम ॥
राक्षससंघविमर्धक राम ॥
अहिमहिरावणचारण राम ॥
संहृतदशमुखरावण राम ॥ ७० ॥
विधिभवमुखसुरसंस्तुत राम ॥
खःस्थितदशरथवीक्षित राम ॥
सीतादर्शनमोदित राम ॥
अभिषिक्तविभीषणनुत राम ॥
पुष्पकयानारोहण राम ॥
भरद्वाजादिनिषेवण राम ॥
भरतप्राणप्रियकर राम ॥
साकेतपुरीभूषण राम ॥
सकलस्वीयसमानत राम ॥
रत्नलसत्पीठास्थित राम ॥ ८० ॥
पट्टाभिषेकालंकृत राम ॥
पार्थिवकुलसम्मानित राम ॥
विभीषणार्पितरंगक राम ॥
कीशकुलानुग्रहकर राम ॥
सकलजीवसंरक्षक राम ॥
समस्तलोकोद्धारक राम ॥

राम राम जय राजा राम ॥
राम राम जय सीता राम ॥

**॥ उत्तरकांडः ॥**

आगत मुनिगण संस्तुत राम ॥
विश्रुतदशकंठोद्भव राम ॥
सीतालिंगननिर्वृत राम ॥
नीतिसुरक्षितजनपद राम ॥ ९० ॥
विपिनत्याजितजनकज राम ॥
कारितलवणासुरवध राम ॥
स्वर्गतशंबुक संस्तुत राम ॥
स्वतनयकुशलवनंदित राम ॥
अश्वमेधक्रतुदीक्षित राम ॥
कालावेदितसुरपद राम ॥
आयोध्यकजनमुक्तित राम ॥
विधिमुखविभुदानंदक राम ॥
तेजोमयनिजरूपक राम ॥
संसृतिबंधविमोचक राम ॥ १०० ॥
धर्मस्थापनतत्पर राम ॥
भक्तिपरायणमुक्तिद राम ॥
सर्वचराचरपालक राम ॥
सर्वभवामयवारक राम ॥
वैकुंठालयसंस्तित राम ॥
नित्यनंदपदस्तित राम ॥

राम राम जय राजा राम ॥
राम राम जय सीता राम ॥ 108 ॥

**इति श्रीलक्ष्मणाचार्यविरचितं नामरामायणं संपूर्णम् ॥**

✧˖·····°*❋ ❋*°·····˖✧

Free download PDF of all types of mantra, stotram,vandana,arati: chalisapdf.net